अथवा ग्रन्थिरहितं दृढ़रज्जुसमन्वितम् ।
त्रिरावृत्त्याथ मध्येनैवाङ्गावृत्त्यान्तदेशतः ॥
ग्रन्थिः प्रदक्षिणावर्त्तः स ब्रह्मग्रन्थिसंज्ञकः ।
नाम्ना योजयेन्मालां नामन्तो योजयेद्बुधः ॥
दृढ़ं सूत्रं नियुञ्जीत जपे त्रुट्यति नो यथा ।
यथा हस्तान्न च्यवते जपतः स्रक् तथाचरेत् ।
हस्ताच्युतायां विघ्नः स्याच्छिन्नायां मरणं
भवेत् ।
एवं यः कुरुते मालां जप्यं च मयकोदितम् ।
स प्राप्नोतीप्सितं कामं हीने स्यात्तु विपर्य्ययः ॥
अन्यत्रापि जपेन्मालां जप्यं देवमनोहरम् ।
ईदृशं साधकः कुर्य्यात् नान्यथा तु कदाचन ॥
यथाशक्ति जपं कुर्य्यात् संख्ययैव प्रयत्नतः ।
असंख्यातन्तु यज्जप्तं तत् सर्व्वं निष्फलं भवेत् ।
जप्त्वा मालां शिरोदेशे प्रांशुस्थानेऽथवा न्यसेत् ॥
इति कालिकापुराणे ५४ अध्यायः ॥*॥*॥
अथ मालादिधारणम् ।
ततः कृष्णार्पितां मालां धारयेत्तुलसीदलैः ।
पद्माक्षैस्तुलसीकाष्ठैः फलैर्धात्र्याश्च निर्म्मिताम् ॥
धारयेत्तुलसीकाष्ठभूषणानि च वैष्णवः ।
मस्तके कर्णयोर्बाह्वोः करयोश्च यथारुचि ॥*॥
अथ मालाधारणविधिः ।
स्कान्दे ।
संनिवेद्यैव हरये तुलसीकाष्ठसम्भवाम् ।
मालां पश्चात् स्वयं धत्ते स वै भागवतोत्तमः ॥
हरये नार्पयेद्यस्तु तुलसीकाष्ठसम्भवाम् ।
मालां धत्ते स्वयं मूढ़ः स याति नरकं ध्रुवम् ॥
क्षालितां पञ्चगव्येन मूलमन्त्रेण मन्त्रिताम् ।
गायत्र्या चाष्टकृत्वो वै मन्त्रितां धूपयेच्च ताम् ।
विधिवत् परया भक्त्या सद्योजातेन पूजयेत् ॥
तुलसीकाष्ठसम्भूते माले कृष्णजनप्रिये ।
बिभर्म्मि त्वामहं कण्ठे कुरु मां कृष्णवल्लभम् ॥
यथा त्वं वल्लभा विष्णोर्नित्यं विष्णुजनप्रिया ।
तथा मां कुरु देवेशि ! नित्यं विष्णुजनप्रियम् ॥
दाने मा धातुरुद्दिष्टो लासि मां हरिवल्लभे ! ।
भक्तेभ्यश्च समस्तेभ्यस्तेन माला निगद्यसे ॥
एवं संप्रार्थ्य विधिवन्मालां कृष्णगलेऽर्पिताम् ।
धारयेद्वैष्णवो यो वै स गच्छेद्वैष्णवं पदम् ॥”*॥
अथ मालाधारणनित्यता ।
तत्रैव स्कान्दे कार्त्तिकप्रसङ्गे ।
“धात्रीफलकृतां मालां कण्ठस्थां यो वहेन्न हि ।
वैष्णवो न स विज्ञेयो विष्णुपूजारतो यदि ॥”
गारुड़े ।
“धारयन्ति न ये मालां हैतुकाः पापबुद्धयः ।
नरकान्न निवर्त्तन्ते दग्धाः कोपाग्निना हरेः ॥”
अतएव स्कान्दे तत्रैव ।
“न जह्यात्तुलसीमालां धात्रीमालां विशेषतः ।
महापातकसंहन्त्रीं धर्म्मकामार्थदायिनीम् ॥*॥
अथ मालामाहात्म्यम् ।
अगस्त्यसंहितायाम् ।
“निर्म्माल्यतुलसीमालायुक्तो यश्चार्चयेद्धरिम् ।
यद्यत् करोति तत् सर्व्वमनन्तफलदं भवेत् ॥
यः कुर्य्यात्तुलसीकाष्ठैरक्षमालास्वरूपिणीम् ।
कण्ठमालाञ्च यत्नेन कृतं तस्याक्षयं भवेत् ॥”
नारदीये ।
“ये कण्ठलग्नतुलसीनलिनाक्षमाला
ये वा ललाटफलके लसदूर्द्ध्वपुण्ड्राः ।
ये बाहुमूलपरिचिह्नितशङ्खचक्रा-
स्ते वैष्णवा भुवनमाशु पवित्रयन्ति ॥”
किञ्च ।
“भुजयुगमपि चिह्नैरङ्कितं यस्य विष्णोः
परमपुरुषनाम्नां कीर्त्तनं यस्य वाचि ।
ऋजुतरमपि पुण्ड्रं मस्तके यस्य कण्ठे
सरसिजमणिमाला यस्य तस्यास्मि दासः ॥”
विष्णुधर्म्मोत्तरे श्रीभगवदुक्तौ ।
“तुलसीकाष्ठमालाञ्च कण्ठस्थां वहते तु यः ।
अप्यशौचोऽप्यनाचारो मामेवैति न संशयः ॥”
स्कान्दे ।
“धात्रीफलकृता माला तुलसीकाष्ठसम्भवा ।
दृश्यते यस्य देहे तु स वै भागवतो नरः ॥
तुलसीदलजां मालां कण्ठस्थां वहते तु यः ।
विष्णूत्तीर्णां विशेषेण स नमस्यो दिवौकसाम् ॥
तुलसीदलजा माला धात्रीफलकृतापि वा ।
ददाति पापिनां मुक्तिं किं पुनर्विष्णुसेविनाम् ॥
तत्रैव कार्त्तिकप्रसङ्गे ।
यः पुनस्तुलसीमालां कृत्वा कण्ठे जनार्द्दनम् ।
पूजयेत् पुण्यमाप्नोति प्रतिपुष्पं गवायुतम् ॥
अयुतसंख्यगोदानफलमित्यर्थः ।
यावल्लुठति कण्ठस्था धात्रीमाला नरस्य हि ।
तावत्तस्य शरीरे तु प्रीत्या लुठति केशवः ॥
स्पृशेच्च यानि लोमानि धात्रीमाला कलौ
नृणाम् ।
तावद्वर्षसहस्राणि वसते केशवालये ॥
यावद्दिनानि वहते धात्रीमालां कलौ नरः ।
तावद्युगसहस्राणि वैकुण्ठे वसतिर्भवेत् ॥
मालायुग्मञ्च यो नित्यं धात्रीतुलसिसम्भवम् ।
वहते कण्ठदेशे च कल्पकोटिं दिवं वसेत् ॥”
तुलसिसम्भवमिति ह्रस्वश्छान्दसः । गारुड़े च
मार्कण्डेयोक्तौ ।
“तुलसीदलजां मालां कृष्णोत्तीर्णां वहेत्तु यः ।
पत्रे पत्रेऽश्वमेधानां दशानां लभते फलम् ॥*॥
तुलसीकाष्ठसम्भूतां यो मालां वहते नरः ।
फलं यच्छति दैत्यारिः प्रत्यहं द्वारकोद्भवम् ॥
निवेद्य केशवे मालां तुलसीकाष्ठसम्भवाम् ।
वहते यो नरो भक्त्या तस्य वै नास्ति पातकम् ।
सदा प्रीतमनास्तस्य कृष्णो देवकिनन्दनः ॥
तुलसीकाष्ठसम्भूतां यो मालां वहते नरः ।
प्रायश्चित्तं न तस्यास्ति नाशौचं तस्य विग्रहे ।
तुलसीकाष्ठसम्भूतां यो मालां वहते नरः ।
तुलसीकाष्ठसम्भूतं शिरसो बहुभूषणम् ।
बाह्वोः करे च मर्त्यस्य देहे तस्य सदा हरिः ॥
तुलसीकाष्ठमालाभिर्भूषितः पुण्यमाचरेत् ।
पितॄणां देवतानाञ्च कृतं कोटिगुणं कलौ ॥
तुलसीकाष्ठमालाञ्च प्रेतराजस्य दूतकाः ।
दृष्ट्वा नश्यन्ति दूरेण वातोद्धूतं यथा दलम् ॥
तुलसीकाष्ठमालाभिर्भूषितो भ्रमते यदि ।
दुःस्वप्नं दुर्निमित्तञ्च न भयं शस्त्रजं क्वचित् ॥”
गौतमीये पुरश्चरणप्रसङ्गे ।
“तथामलकसम्भूतैस्तुलसीकाष्ठनिर्म्मितैः ।
इत्यादि ॥*॥ तत्रैव ।
पुण्डरीकभवा माला गोपालमनुसिद्धिदा ।
आमलकीभवा माला सर्व्वसिद्धिप्रदा मता ।
तुलसीसम्भवा या तु मोक्षं वितनुतेऽचिरात् ॥
इति हरिभक्तिविलासः ॥*॥*॥
अथ रुद्राक्षमालाधारणफलादि ।
लिङ्गपुराणे ।
विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया ।
पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः ॥
संवत्सरप्रदीपे ।
त्रिपुरस्य वधे काले रुद्रस्याक्ष्णोऽपतंस्तु ये ।
अश्रुणो बिन्दवस्ते तु रुद्राक्षा अभवन् भुवि ॥
यद्यप्येकादिचतुर्द्दशमुखरुद्राक्षेषु मन्त्रफल-
विशेषाः सन्ति तथापि सुलभत्वात् पञ्चवक्त्रस्य
फलमन्त्रावभिधीयेते । यथा, स्कान्दे ।
“पञ्चवक्त्रः स्वयं रुद्रः कालाग्निर्नाम नामतः ।
अगम्यागमनाच्चैव अभक्ष्यस्य च भक्षणात् ।
मुच्यते सर्व्वपापेभ्यः पञ्चवक्त्रस्य धारणात् ॥”
इति तिथ्यादितत्त्वम् ॥

मालाकण्टः, पुं, ( मालाकाराः कण्टाः कण्टका अस्य । ) अपामार्गः । इति राजनिर्घण्टः ॥

मालाकन्दः, पुं, (माला गण्डमाला नाशकः कन्दः । शाकपार्थिववत् मध्यपदलोपी ।) मूलविशेषः । तत्पर्य्यायः । आविलकन्दः २ त्रिशिखिदला ३ ग्रन्थिदला ४ पादिकन्दः ५ कन्दलता ६ । अस्य गुणाः । सुतीक्ष्णत्वम् । गण्डमालानाशित्वम् । दीपनत्वम् । गुल्महारित्वम् । वातश्लेष्मापकर्ष-कारित्वञ्च । इति राजनिर्घण्टः ॥

मालाका, स्त्री, ( माला एव । माला+स्वार्थे कन् टाप् । ) माला । इति शब्दरत्नावली ॥

मालाकारः, पुं, (मालां करोतीति । कृ+अण् ।) वर्णसङ्करजातिविशेषः । मालिकः । माली इति ख्यातः । तत्पर्य्यायः । मालिकः २ । इत्यमरः । २ । १० । ५ । मालाकरः ३ पुष्पाजीवी ४ वनार्च्चकः ५ पुष्पलावः ६ । इति जटाधरः ॥ पुष्पलावकः ७ । इति शब्दरत्नावली ॥ स तु शूद्रायां विश्वकर्म्मणो जातः । इति ब्रह्मवैवर्त्तपुराणम् ॥ अपि च ।
“तैलिक्यां कर्म्मकाराच्च मालाकारस्य सम्भवः ॥
इति पराशरपद्धतिः ॥
तद्गृहस्थितपुष्पस्य पर्य्युषितदोषाभावो यथा,
“न पर्य्युषितदोषोऽस्ति तुलसीबिल्वचम्पके ।
जलजे बकुलेऽगस्त्ये मालाकारगृहेषु च ॥”
इति मेरुतन्त्रे ५ प्रकाशः ॥
( यथा, बृहत्संहितायाम् । १० । ६ ।
“हन्ति नापितचाक्रिक-
चौरभिषक्सूचिकदीपग्राहाः ।